संस्कृत-वार्ता:

08.05.2024

सायम् - 06:20

<u>मुख्यवार्ता:</u>

- लोकसभानिर्वाचनस्य अवशिष्टचरणानां कृते प्रचाराभियानं तीव्रं जातम्; प्रधानमन्त्री, भाजपा दलस्य वरिष्ठनेता च नरेन्द्रमोदी तेलंगाना राज्ये जनसभाम् आयोजितवान्।
- रूसीसेनायां युद्धभूमिकायाः कृते भारतीयनागरिकानां तस्करप्रकरणे केन्द्रिय-अन्वेषण-अभिकरणेन सीबीआई इत्यनेन चत्वारः आरोपिणः निगडितः।
- विमानसेविन: न्यूनताया: कारणेन अशीतितोप्यधिकाः एयर-इण्डिया-एक्सप्रेस्-विमानसेवाः निरस्तीकृता: ।
- भारतीय-ॠतु-विज्ञान-विभागेन अद्य पश्चिम-बंगस्य गंगा-तटीय क्षेत्रेषु, ओडिशायां च नारंग वार्णिकी संचेतना-प्रसारिता।
- आई.पी.एल् क्रिकेट् प्रतिस्पर्धा-मालिकायाम् अद्य सायं सनराजइजर्स-हैदराबाद, लखनऊ-सुपर जाएंट्स दलयोर्मध्ये प्रतिस्पर्धा भविष्यति ।

<u>चतुर्थचरणीय अभियानम्</u>

लोकसभानिर्वाचनस्य अवशिष्टचरणानां कृते प्रचाराभियानं तीव्रं जातम्। अद्य प्रातः करीमनगरलोकसभाक्षेत्रस्य वेमुलावाडायां जनसभां सम्बोधयन् प्रधानमन्त्री तथा भाजपादलस्य वरिष्ठनेता नरेन्द्रमोदी विगतदशवर्षेषु एनडीएसर्वकारस्य उपलब्धीनां श्रेयः नागरिकान् दत्तवान्। प्रधानमन्त्रिणा भाजपा दलस्य वरिष्ठनेत्रा च नरेन्द्रमोदिना उक्तं यत् देशः जनानां वर्णस्य आधारेण अनादरं न स्वीकरिष्यति। तेलङ्गानाराज्यस्य वारङ्गलनगरे जनसभां सम्बोधयता श्रीमोदिना पूर्वप्रधानमन्त्रिणः पी वी नरसिंहराव-वर्यस्य विषये काङ्ग्रेसदले आक्रमणं कृतम्। सः अवदत् यत् भाजपायाः नीतिः राष्ट्र प्रथममेवास्ति, सः च अस्मिन् नीतेः कार्यं करोति, तत्रैव काङ्ग्रेस, बीआरएस इत्यादीनां दलानाम् परिवारप्रथमनीतिः अस्ति। एषा परिवारप्रथमनीतिः एव कारणं यत् काङ्ग्रेसेन पी वी नरसिंहाराव-वर्यस्य उपेक्षा, अनादरः च कृतः । श्री मोदिना उक्तं यत् एनडीए पी वी नरसिंहाराव वर्यस्य सम्मानं करोति, तस्मै भारतरत्नेन पुरस्कारेण समलङ्करोति।

प्रधानमन्त्रिणा जनानां आह्वानं कृतम् यत् ते विकासाय मतदानं कुर्वन्तु, ये तेलङ्गाना राज्यस्य अहितं कुर्वन्ति तेषां कृते उपयुक्तं उत्तरं दातव्यम् इति।

उत्तरप्रदेशे अद्य विभिन्नराजनैतिकदलानां बहवः शीर्षनेतारः स्वपक्षीय उम्मीदवारानाम् कृते प्रचारं कुर्वन्ति। अद्य काङ्ग्रेसदलस्य महासचिवः प्रियङ्का गान्धी रायबरेलीनगरे प्रथमं राजनैतिकसभां सम्बोधितवती। सा प्रोक्तवती यत् भगवा इति भाजपा दलं जनान् भ्रामयति, यदि तस्याः दलं सत्तां प्राप्नोति तर्हि आशा-कार्यकर्तृणां, आंगनबाडी-कार्यकर्तृणां, मनरेगा-कार्यकर्तृणां च वेतनं दुगुणं भविष्यति। समाजवादीपक्षस्य प्रमुखः अखिलेशयादवः अद्य शाहजहांपुरे सभायां भाजपायाः विषये अवदत् यत् दलं मिथ्याप्रतिज्ञां करोति । सः पश्चात् फर्रुखाबादनगरे अपि दलस्य प्रत्याशीपक्षे राजनैतिकसभां सम्बोधयिष्यति। भाजपा-दलस्य वरिष्ठनेता तथा केन्द्रीय गृहमन्त्री अमितशाहः अपि लखीमपुर खीरीति मण्डले दलस्य प्रत्याशी तथा केन्द्रीय गृहराज्यमन्त्री अजयमिश्र 'टेनी' इत्यस्य पक्षे राजनैतिकसभां सम्बोधितवान्। सः जनान् भाजपा दलाय मतदानं कर्तुं आह्वानं कृतवान् ।

रूसीसेनायां युद्धभूमिकायाः

रूसीसेनायां युद्धभूमिकायाः कृते भारतीयनागरिकानां तस्करप्रकरणे केन्द्रीय अन्वेषण अभिकरणेन सीबीआई इत्यनेन चत्वारः आरोपिणः निगडितः। केन्द्रीय अन्वेषण अभिकरणानुसारी विदेशेषु लाभप्रद आजिविकायाः प्रलोभनेन देशे सर्वत्र संचालित-प्रमुख-मानव-व्यापार-तन्त्रस्य अन्वेषणं विहितम्। अस्मिन् प्रकरणे सीबीआई इत्यनेन अभिकरणेन मुम्बईकेरलयोः अभियुक्तानां निगडनं विहितम्।

अभिकरणेन उक्तं यत् एते व्यापारिणः रूसदेशे उच्चवेतनमानानां कार्याणां कृते सामाजिक-अन्तर्जाल माध्यमेन तेषां स्थानीयानां कर्मिणां च माध्यमेन भारतीय नागरिकान् आकृष्टुं संगठित-तंत्र-रूपेण कार्यं कुर्वन्तः आसन्। सीबीआई-अनुसारं भारतीय नागरिकाः युद्धभूमिकासु प्रशिक्षिताः, तेषां इच्छाविरुद्धं रूस-युक्रेन-युद्धक्षेत्रे अग्रस्थानेषु नियोजिताः च आसन् ।

केरल -विमानविघटन

विमान-सेवा-प्रबन्धनस्य कतिपयानां नीतीनां विरोधे प्रायः त्रिशताधिका: विमानसेविन: सामूहिक-रुग्णावकाशं स्वीकृतवन्तः येन कारणेन अशीति-तोप्य-धिकाः एयर-इण्डिया-एक्सप्रेस्-विमानसेवाः निरस्ता: येन देशस्य विभिन्न क्षेत्रेषु निजि-विमान-सेवायाः सेवाः प्रभाविताः जाता: । गतरात्रौ केरलस्य चत्वारि अन्ताराष्ट्रिय-विमान-स्थानकानि सम्प्रति अवरूद्धानि सन्ति, यतः कोचीन-अन्ताराष्ट्रिय-विमान-स्थानके चत्वारि अन्ताराष्ट्रिय-विमान-सेवा बेङ्गलूरुतः एकं च अन्ताराज्यीय विमानसेवा विमानपत्तनविभागेन निरस्ती कृतानि। बाधित-अन्ताराष्ट्रियसेवासु शारजाह, बहरीन्, दम्माम्, मस्कट् चेत्यादीनां विमानयानानि सन्ति। यात्रिण: विमानविघटनस्य विषये विमानपत्तने सम्प्राप्य एव ज्ञातवन्तः।

## सैम पित्रोदा

भारतीयानां कृते आपत्तिपूर्ण-टिप्पणी-विषये भाजपा दलेन अद्य काङ्ग्रेसनेतुः सैम पित्रोदा इत्यस्य आलोचना कृता। नवदिल्ल्यां वार्ताहरान् सम्बोधयता दलस्य प्रवक्त्रा सुधांशुत्रिवेदिना उक्तं यत्, पित्रोदामहोदयेन भारतीयसंस्कृतिभिः सममेव देशस्य जनानाम् अपि अपमानं कृतम्। सः अवदत् यत् यथा यथा लोकसभानिर्वाचनं प्रचलति तथा तथा काङ्ग्रेस दलस्य चरितं विचारं च अग्रे आयाति। त्रिवेदीमहोदयः आरोपितवान् यत् काङ्ग्रेसदलस्य समग्रविचारधारा जनानां विभाजनस्य विषये एव अस्ति। दलस्य नेता केन्द्रीयमन्त्री च राजीवचन्द्रशेखरः आरोपितवान् यत् पित्रोदामहोदयस्य टिप्पणी काङ्ग्रेसस्य मानसिकतां प्रकाशयति। पूर्वं पित्रोडामहोदयेन देशस्य विभिन्नभागेभ्यः भारतीयानां चीनी-आफ्रिका-अरब-श्वेत-वर्णीयैः सह तुलना कृता आसीत् । काङ्ग्रेस-दलेन पित्रोदामहोदयस्य टिप्पण्याः निराकरणपूर्वकं प्रोक्तं यत् इदानीं भारतस्य विविधतां प्रदर्शयितुं तेन प्रदत्तोपमाः अत्यन्तं दुर्भाग्यपूर्णाः अस्वीकार्याः च सन्ति।

## भारतीय-ऋतु-विज्ञान-विभाग

भारतीय-ऋतु-विज्ञान-विभागेन अद्य पश्चिम-बंगालस्य गंगा-तटीय क्षेत्रेषु, ओडिशायां च नारंग वार्णिकी संचेतना-प्रसारिता। तेन इदमपि प्रोक्तं यत् देशस्य पूर्व-दक्षिण-द्विपीय-क्षेत्रेषु ऊष्णतायां अद्यारभ्य न्यूनतायास्याति यतोहि एतेषु आगामि केषुचिद दिवसेषु वज्रपातेन सहैव वृष्टेः संभावना अपि दृश्यते। विभागेन अनुमानित यत् आगामि दिनद्वयं यावत् राजस्थाने, पश्चिममध्यप्रदेशे एवमेव तापतरंगस्य स्थिति यथावदेव प्रचलिष्यति। ऋतु-विज्ञान-विभागेन प्रोक्तं यत् आगामि पंच दिनानि यावत् गुजरात, तमिलनाडु, पुद्दुचेरी, केरल चेत्यादिषु क्षेत्रेषु ऊष्ण-आर्द्र-स्थितिः अद्य प्रभृति एवतेव भविष्यति। विभागस्य कथनं अस्ति यत् पश्चिम राजस्थानं विहाय उत्तर भारतस्य अधिकांश-भागेषु अधिकतमतापमाने परिवर्तनस्य काऽपि सम्भावना नास्ति यत्र पश्चिम राजस्थाने आगामि त्रिदिवसेषु तापमानं द्विःत्रिणी डिग्री सेल्सियस्-पर्यन्तं वर्धयिष्यति।

## आई.पी.एल् क्रिकेट्

आई.पी.एल् क्रिकेट् प्रतिस्पर्धा-मालिकायाम् अद्य हैदराबादस्य राजीव-गांधी -अंताराष्ट्रिय-क्रीडांगणे सनराजइजर्स-हैदराबाद, लखनऊ-सुपर जाएंट्स दलयोर्मध्ये सायं सार्ध-सप्तवादने प्रतिस्पर्धा भविष्यति । तत्रैव गतसायं दिल्ल्याः अरूणजेटली क्रिकेट्-क्रीडांगणे दिल्ली-कैपिटल्स् दलेन राजस्थान रॉयल्स दलं विंशतिः धावनांकैः पराजितम् ।

।। इति वार्ताः ।।